# shrImajjagadgurushaMkarAchAryapadAvalambanastutiH

# શ્રીમજ્જગદ્ગુરુશઙ્કરાચાર્યપદાવલમ્બનસ્તુતી

## Document Information

Text title : majjagadgurusha.nkarAchAryapadAvalambanastutiH

File name : shankarAchAryapadAvalambanastuti.itx

Category : deities_misc, stotra, shankarAchArya

Location : doc_deities_misc

Transliterated by : Ramakrishna Upadrasta uramakrishna at gmail.com

Proofread by : Ramakrishna Upadrasta

Latest update : May 18, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીમજ્જગદ્ગુરુશઙ્કરાચાર્યપદાવલમ્બનસ્તુતી

ઓમિત્યશેષવિબુધાઃ શિરસા યદાજ્ઞાં
સમ્બિભ્રતે સુમમયીમિવ નવ્યમાલામ્ ।
ઓઙ્કારજાપરતલભ્યપદાબ્જ સ ત્વં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૧॥

નમ્રાલિહૃત્તિમિરચણ્ડમયૂખમાલિન્
કમ્રસ્મિતાપહૃતકુન્દસુધાંશુદર્પ ।
સમ્રાડ્યદીયદયયા પ્રભવેદ્દરિદ્રઃ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૨॥

મસ્તે દુરક્ષરતતિર્લિખિતા વિધાત્રા
જાગર્તુ સાધ્વસલવોઽપિ ન મેઽસ્તિ તસ્યાઃ ।
લુમ્પામિ તે કરુણયા કરુણામ્બુધે તાં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૩॥

શમ્પાલતાસદૃશભાસ્વરદેહયુક્ત
સમ્પાદયામ્યખિલશાસ્ત્રધિયં કદા વા ।
શઙ્કાનિવારણપટો નમતાં નરાણાં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૪॥

કન્દર્પદર્પદલનં કિતવૈરગમ્યં
કારુણ્યજન્મભવનં કૃતસર્વરક્ષમ્ ।
કીનાશભીતિહરણં શ્રિતવાનહં ત્વાં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૫॥

રાકાસુધાકરસમાનમુખપ્રસર્પ-
દ્વેદાંતવાક્યસુધયા ભવતાપતપ્તમ્ ।
સંસિચ્ય માં કરુણયા ગુરુરાજ શીઘ્રં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૬॥

યત્નં વિના મધુસુધાસુરદીર્ઘકાવ-
ધીરિણ્ય આશુ વૃણ(ણુ)તે સ્વયમેવ વાચઃ ।
તં ત્વત્પદાબ્જયુગલં બિભૃતે હૃદા યઃ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૭॥

શ્રીશઙ્કરાર્યકરુણાવશતઃ પ્રણીતં
સ્તોત્રં તદીયમનુવર્ણ્યુતં તદઙ્ઘ્ર્યોઃ ।
ભક્ત્યા સમર્પિતમિદં પઠતાં નરાણાં
વિદ્યાવિરક્તિમતુલાં ગુરુરાટ્ તનોતુ ॥ ૮॥

ઇતિ શ્રીચન્દ્રશેખરભારતીમહાસ્વમિભિઃ વિરચિતમ્
આચાર્યપદાવલમ્બનસ્તુતિઃ સમ્પૂર્ણમ્ ।

Encoded and proofread by Ramakrishna Upadrasta uramakrishna at gmail.com

*shrImajjagadgurushaMkarAchAryapadAvalambanastutiH*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*